# Vaidyanatha Mahima Varnanam

# વૈદ્યનાથમહિમાવર્ણનમ્

## Document Information

Text title : Vaidyanatha Mahima Varnanam

File name : vaidyanAthamahimAvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 20||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# વૈદ્યનાથમહિમાવર્ણનમ્

ઈશ્વરઃ -
શ્રૃણુ ત્વમગજે પુણ્યાં મમ ભક્તસ્ય સત્કથામ્ ।
ભક્તભક્તં ચ માં વિદ્ધિ ભાવવશ્યોઽસ્મિ શઙ્કરિ ॥ ૧॥

યઃ કશ્ચિદસ્તુ મદ્ભક્તઃ સ મે પ્રિયતમોઽમ્બિકે ।
ભક્તઃ પ્રિયો મે સતતં ચણ્ડાલોઽસ્તુ દ્વિજોઽથવા ॥ ૨॥

ભક્તાન્નસ્ય ક્ષુધાવિષ્ટઃ ત્રિનેત્રઃ પાત્રમમ્બિકે ।
વનખણ્ડમિતિ ખ્યાતં ક્ષેત્રમત્યુત્તમોત્તમમ્ ॥ ૩॥

વૈદ્યનાથોઽહમમલે તલ્લિઙ્ગે સંવસામ્યહમ્ ।
કામાર્થી જનકામાનાં પૂરકોઽહં સદામ્બિકે ॥ ૪॥

અરણ્યશરણો નિત્યં વનાનાં પતિરસ્મ્યહમ્ ।
બ્રહ્મવિષ્ણ્વાદિભિર્દેવૈઃ ગણવૃન્દૈશ્ચ સેવિતઃ ॥ ૫॥

પૂજિતો બિલ્વપત્રાદ્યૈર્નિવસામિ ત્વયા સહ ।
બદરીખદરૈર્બિલ્વૈઃ હરીતકવિભીતકૈઃ ॥ ૬॥

વૈકઙ્કતૈઃ કેતકૈશ્ચ વંશૈઃ કણ્ટકભૂરુહૈઃ ।
અન્યૈશ્ચ શાખિશતકૈઃ ફલપુષ્પાવનામિભિઃ ॥ ૭॥

સંવૃતં વનમત્યુગ્રં સિંહવ્યાઘ્રરવાકુલમ્ ।
વેણુક્રેઙ્કારનિનદૈઃ ઝિલ્લિકાગણપૂજિતૈઃ ॥ ૮॥

કેસરીવિકટારાવભીતદન્તિજબૃંહિતૈઃ ।
ઘૂકોલૂકોત્થઘૂત્કારસંવર્ધિતદિગન્તરમ્ ॥ ૯॥

કેકિકોકિલનાદૈશ્ચ શિવાકોલજઘુર્ઘુરૈઃ ।
ભીષણં ભીષણસ્યાપિ તત્રારણ્યપતિસ્ત્વહમ્ ॥ ૧૦॥

નિવસામિ ત્વયા ગૌરિ તદ્વને સઞ્ચરન્સદા ।

ફલપુષ્પાણ્યપારાણિ પશ્યઞ્જિઘ્રન્વનસ્થલીઃ ॥ ૧૧॥

અરણ્યપતિરેવાહં તદા હિ વનગોચરઃ ।
તત્રાસ્તિ ભિલ્લરાટ્કશ્ચિત્સદાઽત્યન્તસખા મમ ॥ ૧૨॥

ભક્તશ્ચ સતતં દેવિ મયિ પ્રીતિસમન્વિતઃ ।
બદ્ધગોધાઙ્ગુલિત્રાણો મૃગચર્મલસત્કટિઃ ॥ ૧૩॥

વરાહચર્માદિકૃતપાદત્રાણસમન્વિતઃ ।
માતઙ્ગકૃત્તિવિલસત્કઞ્ચુકાવૃતવિગ્રહઃ ॥ ૧૪॥

પિનાકસદૃશં તસ્ય ધનુરસ્ત્યેકમુત્તમમ્ ।
મુષ્ટિના હસ્તલગ્નેન ધનુષા સ વિરાજિતઃ ॥ ૧૫॥

તન્નિષઙ્ગશરૈઃ પૂર્ણં ધારયન્તી તદઙ્ગના ।
સવર્ણવાસસા તં હિ સમાયાસ્યતિ પૃષ્ઠતઃ ॥ ૧૬॥

ગુઞ્જાદિવિધૃતાપારભૂષણાવલિભાસુરા ।
સ મૃગાજિનસર્વાઙ્ગો મધુપિઙ્ગલલોચનઃ ॥ ૧૭॥

તદ્દૃષ્ટિપાતભીત્યૈવ પલાયન્તે મૃગાણ્ડજાઃ ।
કિં પુનસ્તચ્છરાઘાતં મૃગઃ કઃ સોઢુમર્હતિ ॥ ૧૮॥

મૃગં વ મહિષં વાપિ સૃમરં ચમરં રુરુમ્ ।
કોલં શલલકં ચૈવ શશં ખડ્ગં ચ વિધ્યતિ ॥ ૧૯॥

કરીન્દ્રશુણ્ડાકાણ્ડાનિ ગિરીન્દ્રશિખરાણ્યપિ ।
સ્વકાણ્ડશરકાણ્ડૈશ્ચ ખણ્ડયત્યેવ ભિલ્લરાટ્ ॥ ૨૦॥

વ્યાઘ્રં વાપિ તરક્ષું વા સ વિધ્યત્યેવ દુઃસહઃ ।
સદા કટિતટોદ્ભાસિખડ્ગખેટકશોભિતઃ ॥ ૨૧॥

આખેટકપરીવારેર્જાલજાલૈઃ સદાઽઽવૃતઃ ।
ત્રિસહસ્રમહાભિલ્લૈઃ ક્રૂરૈઃ ક્રૂરતરૈર્વૃતઃ ॥ ૨૨॥

તે નિત્યં શસ્ત્રપાષાણખડ્ગખેટધરાઃ સદા ।
ધનુઃશરકરાશ્ચાન્યે નિત્યં તમનુયાયિનઃ ॥ ૨૩॥

વ્યાઘ્રવીર્યૈઃ શ્વમિશ્ચૈવ કરાલોન્નતદંષ્ટ્રિભિઃ ।
કૂજદ્ભિરનુધાવદ્ભિસ્તૈઃ સાકં વક્રપુચ્છકૈઃ ॥ ૨૪॥

જૃમ્ભમાણલલજ્જિહ્વાદીર્ઘશ્રોત્રોરુલોચનૈઃ ।
નીલપીત્યારુણૈર્વર્ણૈર્લાલાતન્તુયુતૈર્મુખૈઃ ॥ ૨૫॥

શશાન્વરાહાંશ્ચ મૃગાનનુદ્રુત્યાશુચિસ્તદા ।
વિદારયન્તિ દશનૈસ્તદ્રક્તાપૂરિતૈર્મુખૈઃ ॥ ૨૬॥

મૃગાન્પાર્શ્વોદરાન્ત્રેષુ વૃક્ણૈશ્ચ વૃષણૈસ્તથા ।
શરપાતાત્પૂર્વમેવ ધાવન્ત્યેતે સુદુઃસહાઃ ॥ ૨૭॥

ભિલ્લાનાં પુરતો દેવિ તસ્મિન્સુગહને વને ।
સ મુષ્ટિધૃતચર્મસ્થશ્યેનૈરુગ્રારુણાક્ષિભિઃ ॥ ૨૮॥

પક્ષિજાલં નિહન્તિ સ્મ વિસૃષ્ટકરબન્ધનૈઃ ।
સ મણ્ડલપરિભ્રશ્યન્નખતુણ્ડોરુકુટ્ટનૈઃ ॥ ૨૯॥

પક્ષપાદપ્રહારૈસ્તાં બલાકાપઙ્ક્તિમુત્થિતામ્ ।
નીલનીરદમધ્યસ્થવિદુલ્લેખેવ ઉપ્રભામ્ ॥ ૩૦॥

પાતયન્તિ મહીપૃષ્ઠે વિષ્ટવ્ધવરકાર્મુકાઃ ।
ગજનીલા મહાભિલ્લાઃ સર્વે મલ્લિઙ્ગપૂજકાઃ ॥ ૩૧॥

તેષાં શ્રેષ્ઠોઽથ મેધાવી જપો નામ્ના મહાબલઃ ।
પત્ન્યા સમન્વિતો નિત્યં ઝષાન્સરસિ હન્ત્યપિ ॥ ૩૨॥

હત્વા વરાહાન્પૃષતાન્રુરૂનન્યાઞ્છશાંસ્તથા ।
સુસ્વાદુમાંસમુત્કૃત્ય નિષ્પ્યાસ્વાદ્ય શોભતે ॥ ૩૩॥

અન્યદાદાય જાલેન વારયન્ભૂરિ તદ્બલમ્ ।
સમ્પ્રેષયતિ તદ્ગૌરિ ગૃહં ભિલ્લગણૈસ્તદા ॥ ૩૪॥

સુસ્વાદુમાંસં પેશ્યાં સ નિક્ષિપ્યાયાતિ માં તદા ।
ભવરોગહરં નામ્ના તીર્થં તત્રાસ્તિ શૈલજે ॥ ૩૫॥

આયુર્વેદઃ પુરા દત્તો મયાઽશ્વિભ્યાં સુપૂજિતઃ ।
સ્નાત્વા તસ્મિન્મહાતીર્થે પૂતૌ દેવભિષગ્વરૌ ॥ ૩૬॥

દેવપઙ્ક્તિગતૌ ચાપિ ભવતાં સોમપીથિનૌ ।
તાભ્યાં સ્તુતોઽહં કલ્યાણિ તત્સ્તુતિં શ્રૃણુ શૈલજે ॥ ૩૭॥

પૂજિતો બિલ્વપત્રૈશ્ચ વૈદ્યનાથો મહેશ્વરિ ॥ ૩૮॥ (વૈદ્યનાથોઽહમીશ્વરિ )

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવગૌરીસંવાદે વૈદ્યનાથમહિમાવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૦ ॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 20..

Notes:
Shiva describes to Devi, the Vaidyanatha Jyotirlinga in Vanakhanda, where bhilla worshipped Him in his own innocent way. Shiva granted the knowledge of Ayurveda to the Ashwini Kumara twins at this Shiva Kshetra.

The shloka numbers are maintained per the source text.

Proofread by Ruma Dewan

---

*Vaidyanatha Mahima Varnanam*

pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*